## ॥ जगद्गुरु श्रीशङ्कराचार्याष्टोत्तरशतनामस्तोत्रम् ॥

श्रीशङ्कराचार्यवर्यो ब्रह्मानन्द-प्रदायकः । अज्ञान-तिमिरादित्यः सुज्ञानाम्बुधि-चन्द्रमाः ॥ १ ॥

वर्णाश्रम-प्रतिष्ठाता श्रीमान् मुक्ति-प्रदायकः । शिष्योपदेश-निरतो भक्ताभीष्ट-प्रदायकः ॥ २ ॥

सूक्ष्म-तत्त्व-रहस्यज्ञः कार्याकार्य-प्रबोधकः । ज्ञानमुद्राञ्चितकरः शिष्य-हृत्तापहारकः ॥ ३ ॥

परिव्राजाश्रमोद्धर्ता सर्वतन्त्र-स्वतन्त्रधीः । अद्वैत-स्थापनाचार्यः साक्षाच्छङ्कर-रूपभृत् ॥ ४ ॥

षण्मत-स्थापनाचार्यः त्रयी-मार्ग-प्रकाशकः । वेद-वेदान्त-तत्त्वज्ञः दुर्वादि-मत-खण्डनः ॥ ५ ॥

वैराग्य-निरतः शान्तः संसारार्णव-तारकः । प्रसन्न-वदनाम्भोजः परमार्थ-प्रकाशकः ॥ ६ ॥

पुराण-स्मृति-सारज्ञः नित्यतृप्तो महान् शुचिः । नित्यानन्दो निरातङ्कः निस्सङ्गो निर्मलात्मकः ॥ ७ ॥

निर्ममो निरहङ्कारः विश्व-वन्द्य-पदाम्बुजः । सत्त्व-प्रधानः सद्भावः संख्यातीत-गुणोज्वलः ॥ ८ ॥

अनघः सारहृदयः सुधीः सारस्वत-प्रदः । सत्यात्मा पुण्यशीलश्च सांख्ययोग-विचक्षणः ॥ ९ ॥

तपोराशिर्महातेजा गुणत्रय-विभागवित् । कलिघ्नः कालकर्मज्ञः तमोगुण-निवारकः ॥ १० ॥

भगवान् भारती-जेता शारदाह्वान-पण्डितः । धर्माधर्म-विभागज्ञः लक्ष्य-भेद-प्रदर्शकः ॥ ११ ॥

नादबिन्दु-कलाभिज्ञः योगि-हृत्पद्म-भास्करः । अतीन्द्रिय-ज्ञाननिधिः नित्यानित्य-विवेकवान् ॥ १२ ॥

चिदानन्दश्चिन्मयात्मा परकाय-प्रवेशकृत् । अमानुष-चरित्राढ्यः क्षेमदायी क्षमाकरः ॥ १३ ॥

भव्यो भद्रप्रदो भूरि-महिमा विश्वरञ्जकः । स्वप्रकाशः सदाधारः विश्वबन्धुः शुभोदयः ॥ १४ ॥

विशाल-कीर्तिर्वागीशः सर्वलोक-हितोत्सुकः । कैलास-यात्रा-सम्प्राप्त-चन्द्रमौलि-प्रपूजकः ॥१५॥

काञ्च्यां श्रीचक्रराजाख्य-यन्त्र-स्थापन-दीक्षितः । श्रीचक्रात्मक-ताटङ्क-तोषिताम्बा-मनोरथः ॥१६॥

श्री-ब्रह्मसूत्रोपनिषद्-भाष्यादि-ग्रन्थ-कल्पकः । चतुर्दिक्-चतुराम्नाय-प्रतिष्ठाता महामतिः ॥१७॥

द्विसप्तति-मतोच्छेत्ता सर्व-दिग्विजय-प्रभुः । काषाय-वसनोपेतः भस्मोद्धूलित-विग्रहः ॥१८॥

ज्ञानात्मकैक-दण्डाढ्यः कमण्डलु-लसत्करः । गुरु-भूमण्डलाचार्यः भगवत्पाद-संज्ञकः ॥१९॥

व्यास-सन्दर्शन-प्रीतः ऋष्यश्रृङ्ग-पुरेश्वरः । सौन्दर्यलहरी-मुख्य-बहु-स्तोत्र-विधायकः ॥२०॥

चतुष्षष्टि-कलाभिज्ञः ब्रह्मराक्षस-मोक्षदः । श्रीमन्-मण्डन-मिश्राख्य-स्वयम्भू-जय-सन्नुतः ॥२१॥

तोटकाचार्य-सम्पूज्यः पद्मपादार्चिताङ्घ्रिकः । हस्तामलक-योगीन्द्र-ब्रह्मज्ञान-प्रदायकः ॥२२॥

सुरेश्वराख्य-सच्छिष्य-सन्न्यासाश्रम-दायकः । नृसिंहभक्तः सद्रत्न-गर्भ-हेरम्ब-पूजकः ॥२३॥

व्याख्या-सिंहासनाधीशः जगत्पूज्यो जगद्गुरुः । इति श्रीशङ्कराचार्य-सर्वलोकगुरोः परम् ॥२४॥

नाम्नाम् अष्टोत्तर-शतं भुक्ति-मुक्ति-फलप्रदम् । त्रिसन्ध्यं यः पठेन्नित्यं सर्वान् कामान् अवाप्नुयात् ॥२५॥